# न्यायमनोविज्ञानयोर्दृष्ट्या प्रत्यक्षलक्षणमीमांसा

**रामचन्द्रुल बालाजी**

**प्राचीनं न्यायशास्त्रम् अर्वाचीनं च मनोविज्ञानम्। आभ्यां प्रतिपाद्ये विषये साम्यं वैषम्यं चावलोक्यते। प्रयोगप्रधान-मिति मन्यते मनोविज्ञानं, विचारप्रधानमिति च न्यायशास्त्रम्। तथाऽपि प्रत्यक्षलक्षणं, प्रत्यक्षविभागः, प्रत्यक्षप्रक्रिया, इन्द्रियाणां विभागः, मनसः स्वरूपमित्यादिविषये अनयोः शास्त्रयोः मतानि सन्तोल्य साम्यवैषम्यपरीक्षणमत्र सप्रमाणं विदधाति लेखकः।**

**प्रत्यक्षलक्षणविचारः–**

**न्यायमतम्**–गौतममहर्षिणा न्यायसूत्रेषु प्रत्यक्षप्रमालक्षणम् एवमुक्तम् 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्।[१] अस्य भाष्यकारः वात्स्यायनः सम्यक् विवरणमकरोत्। तत्र इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमिति लक्षणम्। इन्द्रियाणामर्थैः सह यः सन्निकर्षः तज्जन्यत्वं प्रत्यक्षज्ञानस्य लक्षणम्। वस्तुतः प्रत्यक्षप्रक्रिया एवं भवति। आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेनेति। परं प्रकृतप्रत्यक्षलक्षणे इन्द्रियार्थसन्निकर्षस्यैव कारणत्वेन उक्तत्वात् आत्मनः, आत्ममनस्संयोगस्य, मन इन्द्रियसंयोगस्य च कारणत्वं नोक्तमिति नाशङ्कनीयम्। अत एव भाष्ये 'नाशङ्कनीयम्, इदं कारणावधारणं न' असाधारणकारणत्वप्रदर्शनपरम् एतद्वचनम्। विशिष्टकारणवचनम्। आत्मादीनां तु ज्ञानसामान्यं प्रति कारणत्वात् अस्मिन्सूत्रे तन्नाभिहितम्। मन इन्द्रियसंयोगः असाधारणकारणेऽपि प्रत्यक्षभेदे भेदाभावात् विशेषतया इन्द्रियार्थसन्निकर्षस्यैव इहोपदानां कृतम् इति वात्स्यायनेन भाष्ये निर्णीतम्[२]। भाष्ये ज्ञानपदसार्थक्यं नोक्तम्। ज्ञानपदं विशेष्यसमर्पकम्। ज्ञानपदाभावे इन्द्रियार्थसन्निकर्षध्वंसे अतिप्याप्तिः स्यात्। सुखादिष्वतिव्याप्तिवारणाय ज्ञानपदमिति मञ्जरीकाराः[३]। सूत्रे अव्यपदेश्यपदाभावे प्रत्यक्षस्य शाब्दबोधत्वं प्रसज्येत। तथाहि, नामधेयेन सहिताः एव सर्वे अर्थाः वर्तन्ते। अर्थप्रतीतिरपि नामधेयोपेतैव। शब्दादर्थप्रतीतिः

अर्थप्रतीत्या च व्यवहारः क्रियते। अतः इन्द्रियार्थसन्निकर्षादुत्पन्नम् अर्थज्ञानं रूपमिति, रस इति वा रूपरसशब्दैः व्यपदिश्यत इति तादृशप्रत्यक्षस्य शाब्दत्वापत्तिः। तन्निराकरणाय सूत्रे अव्यपदेश्यपदमिति उक्तम्[४]। व्यवहारकाले शब्दापेक्षासत्त्वेऽपि अर्थज्ञानकाले शब्दापेक्षायाः अभावात् नेदं शाब्दम्। अपि च शाब्दबोधस्थले पदपदार्थयोः शक्तिरूपसम्बन्धज्ञानापेक्षा वर्ततेः। इदं रूपम्, अयं रसः इत्यादिप्रत्यक्षस्थले तु शक्तिज्ञानापेक्षा नास्तीति प्रत्यक्षं शाब्दविलक्षणम्। सूत्रस्थस्य अव्यभिचारिपदस्य सार्थक्यम् एवं वदति भाष्यकारः। 'ग्रीष्मे मरीचयो भौमेनोष्मणा संसृष्टाः स्पन्दमानाः दूरस्थस्य चक्षुषा सन्निकृष्यन्ते। तत्रेन्द्रियसन्निकर्षाद् 'उदकम्' इति ज्ञानम् उत्पद्यते। तच्च प्रत्यक्षं प्रसज्यते इत्यत आह– अव्यभिचारीति। ग्रीष्मे मरुमरीचिषु भौमेनोष्मणा संसृष्टेषु उदकभ्रान्तिः इन्द्रियार्थसन्निकर्षाज्जायते। एवं च इन्द्रियार्थसन्निकर्षोत्पन्नम् इदमुदकमिति भ्रमात्मकं ज्ञानं प्रत्यक्षप्रमा स्यात्। तद्व्यावर्तनाय अव्यभिचारीति[५]। भ्रमभिन्नमिति तदर्थः। इदं जलमिति ज्ञानं भ्रमरूपमिति तद्भिन्नत्वाभावात् न प्रत्यक्षप्रमालक्षणस्यातिव्याप्तिः। व्यवसायात्मकमिति पदस्य प्रयोजनम् एवं वदति भाष्यकारः–'दूरात् चक्षुषा अर्थं पश्यन्नावधारयति, अयं धूम इति वा रेणुरिति वा न निश्चिनोति किन्तु धूमो वा रेणुर्वा इति संदिग्धे। एवं च धूमो वा रेणुर्वा इति संशयात्मकं ज्ञानं प्रत्यक्षप्रमा स्यात्[६]। संशयस्य अयथार्थानुभवप्रभेदतया प्रत्यक्षप्रमात्वं नेष्टम्। अतः व्यवसायात्मकमिति विशेषणे प्रकृतज्ञाने निश्चयत्वाभावात् संशयवारणं भवति। अव्यपदेश्यव्यवसायात्मकदलयोः सार्थक्यविषये न्यायवार्तिकतात्पर्यटीकाकारणाम् वाचस्पतिमिश्राणाम् आशयः अन्यरूपेण द्रष्टुं शक्यते। वाचस्पतिमिश्रैः स्वगुरोः त्रिलोचनस्य मतानुसारेण भाष्यवार्तिककारैः अप्रदर्शितः सविकल्पक–निर्विकल्पकभेदः सूत्रे प्रादर्शि। अनेन इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानम् अव्यभिचारीति, उभयप्रत्यक्षसाधारणं लक्षणमिति प्रतिपादितम्। अव्यपदेश्य–व्यवयसायात्मकमिति पदद्वयेन क्रमेण निर्विकल्पकप्रत्यक्षस्य सविकल्पकप्रत्यक्षस्य च निर्देशः सूत्रकारेण कृत इति वाचस्पतिमिश्राः[७]। मनसः इन्द्रियत्वात् इन्द्रियस्य मनसः अर्थेन आत्मसुखादिना सन्निकर्षात् यत् आत्मसुखादिज्ञानं जायते इति तत्रापि प्रत्यक्षलक्षणस्य अव्याप्तिर्नास्ति। न च मनसः इन्द्रियत्वे 'आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयत्'[८] इत्यस्मिन् सूत्रे मनसः इन्द्रियेभ्यः पृथगुपदेशः अनुपपन्नमिति वाच्यम्। मनसः इन्द्रियत्वेऽपि बाह्येन्द्रियापेक्षया वैलक्षण्यसूचनाश पृथगुपदेशः कृतः। वैलक्षण्यन्तु बहिरिन्द्रियाणां भूतजन्यत्वं वर्तते। 'घ्राणरसनचक्षुस्त्वक्छोत्राणि इन्द्रियाणि भूतेभ्यः'[९] इतीन्द्रियाणां भौतिकत्वम् । पृथिव्यादिपञ्चभूतेभ्यः घ्राणादीनि इन्द्रियाणि उत्पन्नानीति भौतिकानि इन्द्रियाणि। एवं बहिरिन्द्रियाणां नियतविषयत्वञ्च। मनस्त्वभौतिकम्। सर्वविषयकञ्च।

स्वविषयगुणत्वमपि नास्तीति वैलक्षण्यसूचनाय आत्मेन्द्रियेति सूत्रे मनसः पृथगुपदेशः कृतः सूत्रकारेण। यद्यपि सूत्रे इन्द्रियेषु मनसः गणना न कृता तथापि मनसः इन्द्रियत्वमस्य शास्त्रस्य सम्मतम्।[१०]

**मनोविज्ञानम्ः**–ज्ञानेन्द्रियाणामुपयोगेन तत्तदिन्द्रियग्राह्यवस्तूनां तद्विशेषाणाञ्च ज्ञानप्रक्रिया प्रत्यक्षीकरणमिति कथ्यते। मानवः दैनन्दिनजीवने अनेकैः उद्दीपनैः प्रभावितो भवति। सः न केवलं तान्युद्दीपनानि तत्तद् ज्ञानेन्द्रियैः गृह्णाति, अपि तु सः तान्युद्दीपनानि अवगन्तुं प्रभवति। एतादृशमर्थवत् विचक्षणज्ञानमेव प्रत्यक्षमिति व्यपदिश्यते। यथा–मानवः भोजनसमये कस्मिंश्चित् भोज्यपदार्थे लवणाधिक्यमस्तीति, गीतश्रवणसमये तद्गायकस्य नाम च यदा ज्ञातुं प्रभवति तदानीमेव सः मानवः तान्युद्दीपनानि प्रत्यक्षीकृतवानिति वक्तुं शक्यते। न केवलमुद्दीपनैः मानवः उद्दीपितो भवति, अपितु तैरुद्दीपनै–स्साकमर्थवत्संसर्गं च सम्पादयति। एषैव प्रकिया प्रत्यक्षपदेन उच्यते। प्रत्यक्षं गतिशीला प्रक्रिया (Dylamic process) प्रत्यक्षादेव मनुष्याणां कृते विविधोद्दीपनान्यधि–कृत्य स्पष्टज्ञानं भवति। 'ज्ञानेन्द्रियाणाम् विषयैस्साकं संयोगकन आदौ संवेदना (Sensation) ज्ञानं भवति। संवेदना नाम वस्तुनः परिचयमात्रम्। प्रत्यक्षं तद्विषयकं ज्ञानम्। ध्वनेः श्रवणं संवेदना, रूपरसगन्धादिभ्योऽयं पृथक् नारिकेलपतनजन्यश्चेति सप्रकारकं ज्ञानं प्रत्यक्षम् (Perception) संवेदनाऽज्ञातार्थस्य वस्तुनः प्रथमः संस्कारः निर्विकल्पकं भवति। अनन्तरमेव प्रत्यक्षम्[११]। तत्र संवेदनाप्रत्यभिज्ञयोः संयोगो भवति। नवजाते शिशौ गतानुभवानामभावेन वस्तुतः संवेदनैव सम्भवति। अर्थबोधसमर्थे च तस्मिन् संवेदना प्रत्यक्षक्रियास्वरूपं लभते। संवेदनायां तु संवेदना विषयको ज्ञानेन्द्रियसम्पृक्त एव भागः उत्तेजितो भवति, प्रत्यक्षक्रियायां तत्सहचारिप्रदेशोऽपि। संवेदनाऽमिश्रा विशुद्धैका प्रक्रिया। प्रत्यक्षक्रिया सम्मिश्रा। तत्र संवेदनानुभावानां मिश्रणं भवति'[१२]।

**समीक्षणम्**–न्यायशास्त्रीयप्रत्यक्षलक्षणस्य मनोवैज्ञानिकैः कथितप्रत्यक्षचिन्तनस्य च नाधिकः भेदः दृश्यते। नैयायिकप्रत्यक्षलक्षणम् 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमिति। मनोविज्ञानेऽपि सर्वमपि ज्ञानम् इन्द्रियपूर्वकमेव भवति। एवञ्च उभयोः शास्त्रयोर्दृष्ट्यापि ज्ञानेन्द्रियाणां सन्निकर्षः अथैः साकम् आवश्यकः।

* इन्द्रियार्थसंयोगात् आदौ निर्विकल्पकं ज्ञानं भवति न्यायमते। संवेदना भवति मनोविज्ञानमते। एवञ्च उभयत्रापि निष्प्रकारकं भवतीति साम्यम्।
* निर्विकल्पकज्ञानस्य पूर्वानुभवैः साकं सम्बन्धेन सविकल्पकं प्रत्यक्षं भवतीति सादृश्यं दृश्यते।

**प्रत्यक्षविभागः–**

**न्यायमतम्–**न्यायमते प्रत्यक्षं द्विविधं भवति, निर्विकल्पकसविकल्पकभेदेन। यद्यपि सूत्रभाष्ययोर्मध्ये प्रत्यक्षविभागः कण्ठरवेण नोक्तः। मणिकारान्तरकालिकेन विश्वनाथपञ्चाननेनापि स्वकीयन्यायसूत्रवृत्तौ प्रत्यक्षव्याख्यानावसरे स्पष्ट्यकारि यत्, सूत्रस्थ–अव्यपदेश्यव्यवसायात्मकशब्दौ प्रत्यक्षविभागपराविति[१३], अव्यपदेश्यं-निर्विकल्पकं, व्यवसायात्मकं-सविकल्पकमिति द्विविधं प्रत्यक्षमिति।

**मनोविज्ञानम्–**आद्यमिन्द्रियजं ज्ञानं संवेदनपदवाच्यं पूर्वमुक्तम्। तानि च संवेदनजनकानि ज्ञानेन्द्रियाणि पञ्च भवन्तीति संवेदनमपि मुख्यतः पञ्चविधम्। यथा–

* दृष्टिसंवेदना (Visual Sensation)
* श्रोत्रसंवेदना (Auditory Sensation)
* घ्राणसंवेदना (Olfactoty Sensation)
* रससंवेदना (Taste Sensation)
* त्वक्संवेदना (Tactual Sensation)

चेति इन्द्रियप्रधानः संवेदनविभागः कृतः एतादृशसंवेदनानन्तरं जायमानम् अर्थवज्ज्ञानं प्रत्यक्षपदेन व्यपदिश्यते[१४]।

**समीक्षणम्–**नैयायिकैः कृतः प्रत्यक्षविभागः मनोवैज्ञानिकः प्रकारान्तेरण कृतः। नैयायिकैः कथितविभागविषये मनोवैज्ञानिकानां वैमनस्यं नास्ति। विशिष्य समग्राकृतिवादिभिः (Gestalt) अस्मिन् क्षेत्रे विशेषपरिश्रमः कृतः। एतैः प्रतिपादितसंवेदनैव नैयायिकानां मते निर्विकल्पकज्ञानं भवति। तस्य गतानुभवैस्साकं संयोगेन सविकल्पकप्रत्यक्षं भवति[१५]। उभयत्र विभागः समान एव। संवेदनानां विभागविषये मनोवैज्ञानिकैः इन्द्रियप्रधानः संवेदनविभागः कृतः। न्यायदर्शने रूप-रस-गन्ध-स्पर्श-शब्दाः पञ्चज्ञानेन्द्रियाणां विषयाः समाम्नाताः। तदनुसारं १. रूपसंवदेना, २. रससंवदेना, ३. गन्धसंवेदना, ४. शब्दसंवेदना, ५. स्पर्शसंवेदना चेति विषयप्रधानो विभागः कृतोऽस्ति। अयं नामभेद एव न वस्तुगतः भेदः।

**प्रत्यक्षप्रक्रिया–**

**न्यायमतम्–**वस्तुतः प्रत्यक्षप्रक्रिया एवं भवति आत्मा मनसा संयुज्यते। मन इन्द्रियेण, इन्द्रियमर्थेन ततः प्रत्यक्षमिति, नैयायिकानां क्रमः[१६]। तत्र आत्ममनस्संयोगः ज्ञानसामान्यं प्रति कारणम्। मन इन्द्रियसंयोगः बाह्यप्रत्यक्षसामान्यं प्रति कारणम्। इन्द्रियार्थसंयोगस्तु प्रत्यक्षभेदेन भिद्यते। तत्रेन्द्रियार्थसन्निकर्षः षड्विधः न्यायवार्तिक निरूपितः। अपि च प्रत्यक्षसामान्ये महत्त्वस्य, चाक्षुषं प्रति उद्भूतरूपालोकसंयोगादीनामपि कारणत्वमङ्गीकुर्वन्ति नैयायिकाः[१७]।

**मनोविज्ञानम्–**किमपि ज्ञानेन्द्रियं बाह्यपदार्थेन (उद्दीपनेन) संपृक्तं भवति तदा तत्रस्थाः ज्ञानवाहिन्यो नाड्यः उत्तेजिताः भवन्ति। ज्ञानेन्द्रियोत्तेजना च सुषुम्णा मार्गेण मस्तिष्ककेन्द्रं प्राप्नोति। मस्तिष्के लक्षशः जीवकणाः भवन्ति। एकैकप्रत्यक्षस्य कृते नियमितजीवकणाः कार्यं कुर्वन्ति। मस्तिष्कं प्रति आगतोत्तेजनाः विशिष्टज्ञानरूपेण परिणमन्ति। तदा संवेदना जायते। यदा संवेदनया साकं पूर्वानुभवानां मेलनं भवति तदा प्रत्यक्षज्ञानमुत्पद्यते। इयं प्रत्यक्षोत्पत्तिप्रक्रिया[१८]।

**समीक्षणम्–**प्रत्यक्षज्ञाने इन्द्रियार्थसन्निकर्षः उभयोः मतयोः दृष्ट्या समान एव। परन्तु नैयायिकैः कथितप्रत्यक्षप्रक्रियायां विद्यमानाः मन-आत्मादिपदार्थाः अनुमानेन शब्दप्रमाणेन च साध्याः भवन्ति। आधुनिकमनोविज्ञानिनां व्यवहारवादिनां मतानुसारं सर्वोऽपि पदार्थः प्रत्यक्षप्रमाणसाध्यः, प्रयोगशालायां निरूपणयोग्यश्च भवेत्। अतः नैयायिकैरभ्युपगतान् मन- आत्मादिपदार्थान् नाभ्युपगच्छन्ति। समग्राकृतिवादिनां मते तु अन्तर्दृष्ट्या अधिगमः यद्यपि भवति तेषां मते मनसः स्वरूपं किम्? तस्य कार्यं किमिति विचारणीयाम्। मनोवैज्ञानिकप्रत्यक्षप्रक्रियायाम् इन्द्रियार्थसंयोगानन्तरं सर्वमपि कार्यं मस्तिष्कस्यैव। अतः प्रत्यक्षप्रक्रियायाम् उभयोः शास्त्रयोः भिन्नाः सिद्धान्ताः वर्तन्तेः इति ज्ञायते।

**इन्द्रियलक्षणं विभागश्च–**

**न्यायमतम्–**स्वविषयग्रहणलक्षणानि इन्द्रियाणीति भाष्यकारेण इन्द्रियसामान्यलक्षणभिहिताम्[१९]। घ्राणरसनचक्षुस्त्वक् छ्रोत्राणि ज्ञानेन्द्रियाणि। तेषां गन्ध-रस-रूप-स्पर्श-शब्दविषयग्राहकत्वं वर्तत इति समन्वयः। तथा च गन्धग्राहकं घ्राणम्, रसग्राहकं रसनम् इति प्रत्येकलक्षणानि भवन्ति।

इन्द्रियविभागविषये 'घ्राणरसनचक्षुस्त्वक्छ्रोत्राणीन्द्रियाणि भूतेभ्यः'[२०] इति भूतप्रकृतिकानि पञ्च बहिरिन्द्रियाणि न्यायदर्शने प्रतिपादितानि। मनस्तु अन्तरिन्द्रियम्, अभौतिकं सर्वविषयं च। एतत् भेदप्रदर्शनायैव प्रमेयपरिगणनसूत्रे इन्द्रियेभ्यः पृथक्मनसः प्रतिपादनं कृतम्। अतः ज्ञानेन्द्रियाणि षडिति सिद्धम्।

**मनोविज्ञानम्**–ज्ञानेन्द्रियाणि प्रत्यक्षविषये मुख्यकारणानि भवन्ति। ज्ञानेन्द्रियाणि बाह्योद्दीपनानि गृह्यन्ते। अत एव एतेषाम् इन्द्रियाणां ग्राहकाणि (Receptors) इति अन्वर्थनाम[२१]। एतानि प्रत्येकतया स्वविषयग्राहकाणि भवन्तीत्यतः स्वविषयग्राहकत्वम् इन्द्रियाणाम्।

इन्द्रियाणां विषयग्राहकशक्त्यनुसारं प्रधानतया इन्द्रियाणि अष्टौ ग्राहकाणि भवन्ति। तानि क्रमेण दृष्टिग्राहकं, श्रवणग्राहकं, आघ्राणग्राहकं, रसनग्राहकं, स्पर्शग्राहकं, स्तब्धज्ञानग्राहकं, गतिसंवेदनीयग्राहकं, आङ्गिकज्ञानग्राहकमिति इन्द्रियाणां भेदः कृतः वर्तते[२२]।

**समीक्षणम्**–न्यायशास्त्रे स्वविषयग्राहकत्वम् इन्द्रियलक्षणमुक्तम्। तत्र मनोवैज्ञानिकानामपि विप्रतिपत्तिः नैव दृश्यते। इन्द्रियविभागविषये न्यायशास्त्रे पञ्चविध एव बाह्यज्ञानेन्द्रियाणां विभागः दृश्यते। ततोऽतिरिक्तिरूपेण त्रयो भेदाः मनोवैज्ञानिकैः कृताः दृश्यन्ते।

* स्तब्धज्ञानग्राहकम् (Static sense receptor)
* गतिसंवेदनीयग्राहकम् (Kinesthetic sense receptor)
* आङ्गिकज्ञानग्राहकम् (Organic sense receptor)

अत्र संशयः भवति कथम् अष्टौ प्रत्यक्षाणि, इन्द्रियाणि पञ्चैव किल? इति। वस्तुतः मनोवैज्ञानिकाः प्रत्यक्षविषये संवेदनाविषये वा चत्वारि निर्णायकानि अङ्गीकुर्वन्ति। तेषामाधारेणैव विभागः कर्तव्यः। तानि क्रमेण बार्ट्ली (Bertely) महोदयस्य कथनानुसारं।

* एक संवेदनमनन्यसाधारणं भवेत्। एकेनेन्द्रियेण एकप्रकारकप्रत्यक्षमेव भवेत्।
* एकस्य प्रत्यक्षस्य एकमिन्द्रियं भवति। तदेव वस्तुनः प्रत्यक्षस्य मध्यस्थं भवेत्।

* तदिन्द्रियात् मस्तिष्कं प्रति सूचनाप्रेषणाय विशिष्टमार्गः भवेत्।

* प्रत्यक्षसाधनाय प्रेरणावश्यकी। तस्याः प्रेरणायाः निर्दिष्टा शक्तिः भवेत् इति।[२३]

उपरि कथितचतुर्विधतत्त्वानुरोधेन चक्षुरशदीनां पञ्चबाह्येन्द्रियाणां साधने नास्ति विप्रतिपत्तिः। परन्तु स्तब्धज्ञानादीनि त्रीणि ग्राहकाणी ज्ञानेन्द्रियाणि इति प्रत्येकतया कथनं कथम्। तेषां प्रत्येकंमिन्द्रियस्त्वायाभावात् इति कश्चन विचारः।

एवमेव केचन मनोवैज्ञानिकाः चर्मसम्बन्धग्राहकेषु पीडासंवेदनाद्यवान्तरभेदान् कल्पयित्वा दशप्रत्यक्षाणीति कथयन्ति। परन्तु तन्नैव युक्तम्। एतादृशावान्तरविषयभेदेन प्रत्यक्षाणां संख्याकल्पने सहस्राधिकप्रत्यक्षाणि अङ्गीकर्तव्यानि भवेयुः।

**मनोनिरूपणम्–**

**न्यायमतम्–**आन्तरिकमिन्द्रियं मनः भवति। तत्सद्भावे अनुमानं प्रमाणम्। यथा–'स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छादयश्च मनसो लिङ्गानीति'[२४]। 'युगपद् ज्ञानानुपपत्तिर्मनसो लिङ्गम्'[२५] इत्यादिसूत्राणि न्यायसूत्रकारेण प्रतिपादितानि दृश्यन्ते। इन्द्रियार्थसन्निकर्षेषु सत्स्वपि युगपज्ज्ञानानि नोत्पद्यन्ते। तेनेदं निर्णीयते तत्तदिन्द्रियसंयोगि अव्यापि निमित्तान्तरमस्तीति। यस्य सन्निधौ ज्ञानमुत्पद्यते। यदभावे ज्ञानं नोत्पद्यते, तदेव मनः इति अङ्गीकर्तव्यम्। इदं च मनः न भौतिकम्। भौतिकत्वे नियतविषयत्वापत्तिः। मनः अनियतविषयत्वात् अभौतिकम्। सर्वबाह्येन्द्रियाणां सहकारि। तच्च मनः प्रतिशरीरं भिन्नम् एकं च। अणुपरिमाणं च। विभुत्वे मनसः सर्वेन्द्रियसम्बन्धः सर्वदा भवतीति ज्ञानयौगपद्यप्रसङ्गः।

**मनोविज्ञानम्–**दार्शनिकैः अङ्गीकृतान् मन–आत्मादिपदार्थान् आधुनिकमनोवैज्ञानिकाः नाभ्युपगच्छन्ति। तेषां मते मस्तिष्कम् (Brain) एकमिन्द्रियं भवति यत्र अर्बुदाधिकसंख्याकाः जीवकणाः भवन्ति। एते परस्परसंयोगेन कार्यं कुर्वन्ति। मानसिककार्याणां सर्वेषामेतदेवेन्द्रियम्।

इन्द्रियेभ्यः ग्राह्यसंवेदनाना व्यवस्थापनम् अर्थकल्पनं, पूर्वानुभवैस्साकं सम्मेलनं, प्रकृतविद्यमानपरिस्थित्यनुगुणव्यवहारस्य निर्देशनं च मस्तिष्कस्य कार्यं भवति। संवेदना–प्रत्यक्षम्–ऊहा–तुलनं–न्यायनिर्णयः–कल्पनम् इत्यादीनां सर्वेषामेतदेव कारणं भवति। मस्तिष्कं नामकमिन्द्रियं मूर्तद्रव्यं भवति[२६]। अत्र केचन मस्तिष्कमेव मनः

इति अतिरिक्तसूक्ष्मेन्द्रियमिति च मन्वते। मनसः अतिवेगत्वाम् मस्तिष्कस्य कार्यरूपक्रियात्वेन च केचन मन्यन्ते।

**समीक्षणम्**—मनसः स्वरूपविषये उभयोः भेदः स्पष्ट एव। नैयायिकैः अनुमानप्रमाणात् युगपत्ज्ञानानुत्पत्तिकारणाच्च मनसः साधनं कृतम्। मनोवैज्ञानिकाः अपि ज्ञानानां यौगपद्यं नाङ्गीकुर्वन्ति। परन्तु एकाधिकप्रत्यक्षाणि नियमेन युगपन्न सम्भवन्तीति, अथवा इतरप्रत्यक्षैः प्रकृतप्रत्यक्षं प्रभावितं न भवतीति वक्तुं नैव शक्यते इति वदन्ति मनोवैज्ञानिकाः। एकस्य विषयस्य प्रत्यक्षीकरणसमये इतरप्रत्यक्षाणां प्रभावः किमर्थं न भवतीति विषये उदासीनाः भवन्ति मनोवैज्ञानिकाः। केचन मनोवैज्ञानिकाः तदितरप्रत्यक्षाणां प्रभावं स्थिरदोषः (Constant error) इति स्वीकुर्वन्ति। एवञ्च अयं विषयः अङ्गीकर्तव्यः यदयौगपद्यप्रत्यक्षविषये जीर्विज्ञानिभिः मनोवैज्ञानिकैर्वा बहुचिन्तनं न कृतम्। अस्मिन् क्षेत्रे इतोऽपि यत्नः करणीय इति।

एवमेव लौकिकालौकिकप्रत्यक्षभेदं स्वीकृत तत्र नैयायिकैः कृतः सन्निकर्षप्रकारः आधुनिकशास्त्रेषु नैव दृश्यते तत्रापि लौकिकसन्निकर्षेषु संयोगसन्निकर्षं विहाय संयुक्तसमवायादिसन्निकर्षादीनाम् आवश्यकता वैज्ञानिकानां नास्तीति भाति। एवमेव दार्शनिकैः प्रतिपादितेषु अलौकिकसन्निकर्षेष्वपि मनोवैज्ञानिकाः उदासीनाः एव। यतोहि अलौकिकसन्निकर्षाः प्रयोगशालायां प्रयोपूर्वकं सिद्धान्तयितुम् अथवा अन्यव्यवहारेण निरूपितुं न शक्याः। अतः सामान्यलक्षणाद्यलौकिकसन्निकर्षान्यधिकृत्य मनोवैज्ञाने कुत्रापि उल्लेखः नैव दृश्यते इति भाति। तथापि १९६० अनन्तरं मनोविज्ञाने कश्चन सम्प्रदायः आविर्बभूव, यस्य नाम ट्रैन्स्पर्सन् सैकोलजि (Transperson Psychology)[२७]इति। अत्र पञ्चज्ञानेन्द्रियेतरप्रत्यक्षविषयस्याध्ययनम् अर्थात् अलौकिकप्रत्यक्षस्य अध्ययनमत्र प्रधानपदार्थः। अस्मिन् विषये मास्लो (Maslow) सुटिच (Sutich) इत्यादयः प्रसिद्धाः। एवञ्च अलौकिकसन्निकर्ष-विषयेऽपि आधुनिकमनिवैज्ञानिकाः प्रयत्नं कुर्वन्तीति ज्ञायते।

---

१. न्यायदर्शनम्, गौतमहर्षिः, १:१:४
२. न्यायसूत्रभाष्यम्, वात्स्यायनमहर्षिः, १:१:४
३. न्यायमञ्जरी (प्रथमभागः), जयन्तभट्टः, –पृ. सं – ७०
४. न्यायसूत्रभाष्यम्, वत्स्यायनमहर्षिः, –१.१.४
५. तत्रैव,
६. तत्रैव,
७. न्यायवार्तिकतात्पर्यटीका, वाचस्पतिमिश्रः, – १.१.४
८. न्यायदर्शनम्, – १.१.९

९. न्यायदर्शनम्, १.१.१२
१०. General Psychology, IInd edition-J.P. Guilford, - P.No . 135
मनोविज्ञानशास्त्रमु, तेलुगुसाहित्य-अकाडमिपब्लिकेशन्, - पृं. सं. - ८६-८७
११. अभिनवमनोविज्ञानम्, अग्निहोत्री - पृ. सं. - ६१
१२. तत्रैव,
१३. न्यायसूत्रवृत्ती, विश्वनाथपञ्चाननः, - पृ. सं. - २२
१४. मनोविज्ञानमीमांसा, आचार्यविश्वेश्वरः, - पृ. सं. - 176
१५. उच्चतरशिक्षामनोविज्ञान (हिन्दी), सुशीलगुप्ता-अलकागुप्ता, - पृ. सं. ३७६
१६. न्यायसूत्रभाष्यम्, १.१.४
१७. सिद्धन्तमुक्तावली, विश्वनाथन्यायपञ्चाननः, पृ. ८-१५४
१८. Manual of Psychology, Jadunath Sinha , P.No. 140
१९. न्यायभाष्यम्, १.१.१२
२०. न्यायदर्शनम्, १.१.१२
२१. मनोविज्ञानशास्त्रमु, तेलुगुसाहित्य-अकाडेमी पब्लिकेशन्, पृ. सं. - ४९
२२. तत्रैव, - पृ. सं. ५०
२३. Principles of Perception, S.H. Bartely, P.No - 60
२४. न्यायसूत्रभाष्यम्, १.१.१५
२५. न्यायदर्शनम्, १.१.१६
२६. मनोविज्ञानशास्त्रमु, पृ. सं. ६०
२७. Theoires of Personality, Hall, P.No. 120